Roll No.
रोल नं.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

**Series SHC** **Code No. 49**
कोड नं.

- Please check that this question paper contains 11 printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains 12 questions.
- Please write down the serial number of the question before attempting it.
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 11 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में 12 प्रश्न हैं।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।

# SANSKRIT (Elective)
# संस्कृतम् (ऐच्छिकम्)

*Time allowed : 3 hours* *Maximum Marks : 100*
*निर्धारित समय : 3 घण्टे* *पूर्णाङ्काः : 100*

***निर्देशः :***

*सर्वे प्रश्नाः संस्कृतेनैव उत्तरणीयाः।*
*सभी प्रश्नों के उत्तर संस्कृत में दें।*
*Answer should be given in Sanskrit only.*

*उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।*
*सभी उत्तर अलग दी गई उत्तर-पुस्तिका में लिखें।*
*Answer should be written only in the separate answer-book provided.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति।*
*इस प्रश्न-पत्र में **चार** खण्ड हैं।*
*There are **four** sections in this questions paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश - अवबोधनम् (अपठितांश - अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | रचनात्मकलेखनम् (रचनात्मक लेखन) | 20 अङ्काः |
| SECTION B | (Writing Skills) | |
| खण्डः ग | पठितांश - अवबोधनम् (पठितांश - अवबोधन) | 45 अङ्काः |
| SECTION C | (Reading Comprehension) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवं अलङ्कार) | 20 अङ्काः |
| SECTION D | (Chhanda and Alankaras) | |

## खण्डः क (SECTION A)
## अपठितांश - अवबोधनम्
## अपठितांश - अवबोधन
## Unseen Reading Comprehension 15

**1.** अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रश्नान् संस्कृतेन उत्तरत :
अधोलिखित दोनों अनुच्छेदों को पढ़कर प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following two passage and answer the questions in Sanskrit :

(क) **प्रथमः अनुच्छेदः**

अस्मिन् संसारे सर्वेषां जीवानां निजो धर्मः अस्ति। यथा मनुष्याः निजधर्मं पालयन्ति तथा सर्पाः, वृश्चिकाः हिंस्राः पशवो वा स्वधर्मं धारयन्ति।यथा तनोःधर्मः तथा मनसः अपि। यद्यपि धर्मविचारणे वयम् एतद् न विचारयामः, तथापि एतत्तत्त्वं ज्ञातुं परमावश्यकम्। मनोधर्मः अस्ति, अग्नेरिव सदैव बुभुक्षा। यावद् इन्धनं दास्यते तावदग्निदाहो भविष्यति। प्राज्ञो जनः शिक्षणेन कदापि तृप्तो न भवति, सदैव स ज्ञातुमुत्सुकः भवति। विश्वसुन्दरी नारी कदापि आत्मानं सौन्दर्यविमुखीं न करोति। सहस्रकोटिधनं लब्ध्वा जनः ततोऽप्यधिकं धनमभिलषत्येव।मनसो द्वितीयो धर्मोऽप्यस्ति, प्राप्तं धनं स्ववशे एव धारयति। भूते वर्तमाने वा तत् नाशयितुं नेच्छति। परं सत्यं तु विद्यते एतद् यद् न तु अमेरिकाराष्ट्रपतिःसर्वं प्राप्तुं समर्थः न वा लघुदेशस्य मालदीवस्य राष्ट्रपतिः। अतः मानवेन सदा सन्तुष्टेन भवितुं प्रयासःकर्तव्यः।

**प्रश्नाः**

(अ) एकपदेन उत्तरत :
एक शब्द में उत्तर दीजिए :
Answer in one word : ½×2=1

(i) धर्मः केषाम् अस्ति?

(ii) वृश्चिकाः कं धारयन्ति?

(ब) पूर्णवाक्येन उत्तरत :
पूर्ण वाक्य में उत्तर दीजिए :
Answer in a complete sentence : 2

कः को वा सर्वं प्राप्तुम् असमर्थः ?

(स) यथानिर्देशम् उत्तरत :
यथानिर्देश उत्तर दीजिए :
Answer as directed : ½×4=2

(i) अग्नेरिव अत्र कः सन्धिच्छेदः?

(ii) 'मनसो द्वितीयो धर्मोऽप्यस्ति' अत्र कर्तृपदं किम्?

(iii) 'रक्षितुम्' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'सदा सन्तुष्टेन मानवेन प्रयासः कर्तव्यः' अत्र विशेष्यपदं किम्?

(ख) **द्वितीयः अनुच्छेदः**

राजा ज्ञानसेनः स्वराज्ये शास्त्रार्थस्य आयोजनमकरोत्। दशदिनानि यावत् वादविवादयोः सतोः भारविः विजयी घोषितः। विद्वांसं भारविं सम्मानयितुं राजा तं गजारूढं कृत्वा, परिचरन् गृहं प्रेषितवान्। भोजनसमये यदा भारविः स्वपितरमुदासीनपश्यत् तदा स मातरं तस्य कारणमपृच्छत्। माता प्रत्यवदत् - यो विजयः त्वया प्राप्तः, जानासि तं प्रति तव पितुः कियत् तपः अस्ति। विजयमदपराभूतः त्वं स्वपितरं प्रति सम्मानसूचक -वचांसि अपि नाब्रवीः।किं विद्वत्ता विनयस्य त्यागः एव? त्वं तु राज्ञः अपि विनयं न शिाक्षितवान्, यः त्वां सम्मानयितुं स्वयं परिचर्यापरःअभवः। मातुर्वचः श्रुत्वा भारविः स्वमहंकारितं ज्ञात्वा, आत्मानं धिक्कृत्य पितुः चरणयोः अलुण्ठत्।

**प्रश्नाः**

(अ) एकपदेन उत्तरत :
एक शब्द में उत्तर दीजिए :
Answer in one word : ½×4=2
(i) कस्य राज्ये शास्त्रार्थः आयोजितः?
(ii) कति दिनानि वादविवादौ अभवताम्?
(iii) भारविः कां पितुः उदासीनताकारणम् अपृच्छत्?
(iv) कः विनयं न शिक्षितवान्?

(ब) पूर्णवाक्येन उत्तरत :
पूर्ण वाक्य में उत्तर दीजिए :
Answer in a complete sentence : 1×2=2
(i) विद्वांसं भारविं सम्मानयिंतु राजा किमकरोत्?
(ii) मातुर्वचः श्रुत्वा भारविः किमकरोत्?

(स) 'यो विजयः त्वया प्राप्तः' अत्र 'त्वया' इति सर्वनामपंद कस्मै प्रयुक्तम्?
'यो विजयः त्वया प्राप्तः' यहाँ 'त्वया' यह सर्वनाम पद किसके लिए प्रयुक्त है ?
'यो विजयः त्वय ा प्राप्तः' In this sentence for whom is 'त्वया' pronoun used ? 1

(द) यथानिर्देशम् उत्तरत :
यथानिर्देश उत्तर दीजिए :
Answer as directed : 1×3=3
(i) 'तव पितुः कियत् तपः अस्ति।' अत्र कर्तृपंद किम्?
(ii) 'विद्वांसं भारविं सम्मानयितुम्' अत्र विशेष्यं किम्?
(iii) 'आकर्ण्य' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(य) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।
इस अनुच्छेद के लिए समुचित शीर्षक लिखिए।
Write a suitable title for this paragraph. 2

## खण्डः ख (SECTION B)
## रचनात्मकलेखनम्
## रचनात्मक लेखन
## Writing Skills

20

**2.** मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पुनः उत्तरपुस्तिकायां लिखत :

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पुनः उत्तर-पुस्तिका में लिखें :

Re-write the following story, taking hints from the words given in the box below : 1×10=10

राजा राजेश्वरः अतुलभोगान्, वैभवं सत्तासुखं च निरर्थकं (i) __________तपस्विनः रूपे (ii) __________ , यावत् आत्मतत्त्वम् अन्वैषयत् (iii) __________ स कामपि सफलतां न (iv) __________। एकदा स (v) __________ एकम् अन्नागारम् अधिगतवान्। कृषकः तं तत्र दृष्ट्वा भृशं (vi) __________ , उवाच च ''आगच्छ भिक्षो! तण्डुलानि नीत्वा एतानि (vii) __________। अर्धं भवान् भक्षयतु, अर्धं च भोजनम् अहम् करिष्यामि।'' भिक्षुः तथैव सर्वं व्यदधात्। श्रान्तश्च तत्रैव वृक्षम् (viii) __________ छायायां शयितवान्। क्षणानन्तरे स सम्मुखे तेजसा देदीप्यमानं पुरुषम् अद्राक्षीत्। स राजानम् उवाच - ''अहं कर्म अस्मि, सृष्टेः परमं तत्त्वम्। रिक्ते (ix) __________ लीनः त्वं माम् विस्मृतवान्। अद्य श्रमस्य (x) __________ त्वं मामधिगतवान्। एवं सृष्टौ कर्मणि अनासक्तः सन् जनोऽमरत्वं प्राप्तुं क्षमः भवितुं शक्नोति।

| मञ्जूषा |
|---|
| अर्चनया, तपसि, शतवर्षाणि, ज्ञात्वा, परम्, अधः, प्रासीदत्, क्षुधापीड़ितः, पाचय, प्राप्तवान्। |

**3.** मञ्जूषातः पदानि गृहीत्वा 'पर्यावरणस्य रक्षणम्' इति विषये संस्कृतेन दश वाक्यानि लिखतः

मञ्जूषा से पदों को लेकर 'पर्यावरण रक्षा' पर संस्कृत में दस वाक्य लिखिए :

Write ten sentences in Sanskrit on the topic 'Protection from Pollution' taking words from the box : 1×10=10

| मञ्जूषा |
|---|
| वृक्षणां छेदनाभावः, नदीषु दूषितपदार्थानाम् क्षेपणाभावः, लघूद्योगानां विशालोद्योगानां च पृथक् स्थानेषु स्थापनम्, यानानां प्रदूषणस्य अभावः, पशूनां समुचिता आवासव्यवस्था। |

## खण्डः ग (SECTION C)
## पठितांश - अवबोधनम्
## पठितांश - अवबोधन
## Reading Comprehension

45

**4.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर यथानिर्देश संस्कृत में दें:

Read the following prose-poetry-drama passage and answer the questions as per instructions in Sanskrit :

(क) **गद्यांशः**

गङ्गदत्त आह - "भद्र ! कृतं त्वया मित्रकृत्यं। तत्साम्प्रतं घटिकायन्त्रमार्गेण गम्यताम्" इति। सर्प आह - "भो गङ्गदत्त! न सम्यगभिहितं त्वया। कथमहं तत्र गच्छामि? मदीयबिलदुर्गमन्येन रुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत् सर्वानपि भक्षयिष्यामि।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत :
एक शब्द में उत्तर दीजिए :
Answer in one word : ½×2=1

(i) मित्रकृत्यं केन कृतम्?

(ii) गङ्गदत्तः सर्पं केन गन्तुं कथयति?

(ब) पूर्णवाक्येन उत्तरत :
पूर्ण वाक्य में उत्तर दीजिए :
Answer in a complete sentence : 2

सर्पः कान् भक्षयिष्यति?

(स) यथानिर्देशम् उत्तरत :
यथानिर्देश उत्तर दीजिए :
Answer as directed : 1×2=2

(i) 'अधुना' इत्यर्थे किम् अव्ययम् अत्र प्रयुक्तम्?

(ii) 'अनुचितम्' इत्यस्य किं विलोमपदमत्र प्रयुक्तम्?

(ख) **गद्यांशः**

जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : ½×2=1

(i) कया दिक्षु तन्यते कीर्तिः?

(ii) सत्संगतिः वाचि किं सिञ्चति?

(ब) पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : 2

सत्संगतिः पुंसां किं किं करोति?

(स) यथानिर्देशम् उत्तरत :

यथानिर्देश उत्तर दीजिए :

Answer as directed : 1×2=2

(i) 'सत्संगतिः पुंसां किं करोति' अत्र कर्तृपदं किम्?

(ii) 'बुद्धेः' अस्य कः पर्यायः अत्र प्रयुक्तः?

(ग) **नाट्यांशः**

वटवः - भो भोः! किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति?

लवः - (सस्पृहमात्मगतम्) अश्वमेध इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः।

(नेपथ्ये)

योऽयमश्वः पताकेयमथवा वीरघोषणा।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : ½×2=1

(i) 'अश्वमेधः' इति केषामुत्कर्षनिकषः?

(ii) अश्वः कथं पर्यटति?

(ब) पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : 2

वीरघोषणा कीदृशस्य कस्य चास्ति?

(स) यथानिर्देशम् उत्तरत :

यथानिर्देश उत्तर दीजिए :

Answer as directed : 1×2=2

(i) 'तेजस्वी' अस्य कः पर्यायः अत्र प्रयुक्तः?

(ii) 'लघुः' अस्य किं विलोमपदमत्र प्रयुक्तम्?

**5.** रेखाङ्कितपदानां शुद्धम् अर्थं प्रदत्तार्थेभ्यः मेलयित्वा लिखत :

रेखाङ्कित पदों का शुद्ध अर्थ दिए गए अर्थों से मिलाकर लिखिए :

Write the correct meaning of the underlined words after matching them with the given meanings : ½×4=2

(अ) प्रातः प्रातर्मधुयुतं कामलार्त्ताय योजयेत्।

(i) कृष्णवर्णेन आर्ताय

(ii) कमलस्य पुष्पाय

(iii) पाडुरोगपीडिताय

(ब) पिबेत्सुखोष्णं सबिडं गुल्मानाहारार्तिजिच्च यत्।

(i) वृक्षवृद्धिकारकम्

(ii) गुल्मपीडाहरम्

(iii) गुल्मवृद्धिवेदनाहरम्

(स) कुम्भस्य चूर्णं सक्षौद्रं त्रैफलेन रसेन वा।

(i) घटस्य

(ii) स्नानस्य

(iii) गुग्गुलस्य

(द) त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसम्।

(i) उलूखलेन

(ii) चमसेन

(iii) दारूहरिद्रया

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत :

रेखाङ्कित शब्दों पर आधारित प्रश्न-निर्माण कीजिए :

Frame questions based on the underlined words : 1×4=4

(i) सत्येन <u>पन्था</u> विततो देवयानः।

(ii) <u>कर्मणैव</u> संसिद्धिमास्थिता जनकादयः।

(iii) <u>पुरुषा</u>णामखिमलप्रत्यक्षालनक्षमम्।

(iv) कर्परेऽभिनवे <u>शुचौ</u>।

**7.** अधोलिखितभावार्थयोः रिक्तस्थानपूर्तिः मञ्जूषापदसहायतया कुरुत :

निम्नलिखित भावार्थों में मञ्जूषा के शब्दों की सहायता से रिक्तस्थान पूर्ति कीजिए :

Fill in the blanks in the following explanations with the help of words given in the box : 3+3=6

(अ) श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते, प्रेयो मन्दो योगक्षेमाद् वृणीते।।

<u>भावार्थः</u>

सामान्यतः लौकिकः (i) ____________ कल्याणं च प्राणिनं प्रति स्वयमागच्छतः। यः जनः (ii) ____________ स तौ लब्ध्वा सम्यग् विचारयति (iii) ____________ जनः अभ्युदयात् कल्याणं, अल्पज्ञः च प्रियतरं वस्तु समधिगच्छति।

(ब) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।

<u>भावार्थः</u>

श्रीकृष्णो युद्धक्षेत्रे कर्मणो विरतमर्जुनं सम्बोधयति -

हे अर्जुन! त्वं (i) ____________ स्वकार्यं कुरु। कर्महीनतायाः तु कर्म एव (ii) ____________। यः जनः कर्म न करोति तस्य तु (iii) ____________ एव अलम्।

| **मञ्जूषा** |
|---|
| बुद्धिमान्, धीरः, अभ्युदयः, वरम्, जीवितेन, प्रशस्यतरम्। |

**8.** अधोलिखितयोः अन्वययोः रिक्तस्थानानि पूरयत :

निम्नलिखित अन्वयों में रिक्तस्थान-पूर्ति कीजिए :

Fill in the blanks in the following prose order renderings : 1½×1½=3

(अ) ततश्चागत्य मामेव वादायाह्वयते स्म सः।
प्रवृत्ते चावयोर्वादे प्रयाताः सप्त वासराः।।

<u>अन्वयः</u>

ततः च सः (i) ____________ वादाय माम् एव (ii) ____________। आवयोः वादे (iii) ____________ सप्त वासराः प्रयाताः।

(ब) प्रथमं टूयमानोऽपि वसिष्ठस्याज्ञया ततः।
कौशिकस्य करे राजा ददौ रामं सलक्ष्मणम्।।

अन्वयः

प्रथमम् (i) _____________ अपि, ततः वसिष्ठस्य (ii) _____________ राजा कौशिकस्य करे (iii) _____________ रामं ददौ।

**9.** यथानिर्देशम् उत्तरत :
यथानिर्देश उत्तर दें :
Answer as directed :

(क) कः कं कथयति?
कौन किसको कह रहा है ?
Who is saying this to whom ? 1×2=2

(i) मनो मे संमोहस्थिरमपि हरत्येष बलवान्।
(ii) 'पाषाणचयनिबद्धे कूपे'।

(ख) विशेष्यं चिनुत :
विशेष्य चुनिए :
Select the qualified noun : 1×2=2

(i) चरणोपभोगसुलभो लाक्षारसः।
(ii) दारुणो लक्ष्मीमदः।

(ग) कर्तृपदं चिनुत :
कर्ता चुनिए :
Select the subject : 1×2=2

(i) तयोरन्यः पिप्पलं स्वाद्वत्ति।
(ii) आप्तोपसेवी च भवत्यरोगः।

(घ) ''एष वो लवस्य शिरसा प्रणामपर्यायः।'' अस्मिन् वाक्ये ''एषः'' इति सर्वनामपदं कस्मै प्रयुक्तम्?
''एष वो लवस्य शिरसा प्रणामपर्यायः।'' इस वाक्य में ''एषः'' यह सर्वनाम पद किसके लिए प्रयुक्त है ? :
''एष वो लवस्य शिरसा प्रणामपर्यायः।'' In this sentences pronoun ''एषः'' has been employed for whom ? 2

(ङ) अधोलिखितपदयोः पर्यायौ लेख्यौ :
निम्नलिखित पदों के पर्याय लिखिए :
Write the synonyms of the following words : ½+½=1

(i) दायादः
(ii) नृशंसः

(च) अधोलिखितपदयोः विलोमपदे लेख्ये :

निम्नलिखित पदों के विलोम शब्द लिखिए :

Write the antonyms of the following words : ½+½=1

(i) वत्सलः

(ii) विपद्

**10.** अधोलिखितयोः **एक**स्य संक्षिप्त-परिचयः लेख्यः -

निम्नलिखित में से किसी **एक** का संक्षिप्त परिचय दीजिए :

Write a brief note on any **one** of the following : 1×5=5

(i) विष्णुशर्मा

(ii) अभिज्ञानशाकुन्तलम्

## खण्डः घ (SECTION D)
## छन्दोऽलङ्काराः
## छंद एवं अलङ्कार
## Chhanda and Alankaras 20

**11.** (अ) प्रश्नान् उत्तरत :

प्रश्नों के उत्तर दीजिए :

Answer the questions : 1×6=6

(i) लघुवर्णः कदा गुरुर्भवति?

(ii) 'विनीतम्' अस्मिन् पदे को गणः?

(iii) वसन्ततिलका-छन्दसि कति वर्णाः?

(iv) शिखरिणी-छन्दसि 'रसैः' अनेन कोऽभिप्रायः?

(v) अनुष्टुप् छन्दसः अन्यत् किं नाम?

(vi) उपजाति-छन्दसि कयोः छन्दसोः प्रयोगः भवति?

(ब) अधोलिखिताः परिभाषाः पूरयत :

निम्नलिखित परिभाषाएँ पूरी कीजिए :

Complete the following definitions : 1×2=2

(i) जतौ तु.........................जरौ।

(ii) ननमयय................ भोगिलोकैः।

(स) अधोलिखितेषु कस्यचि**देक**स्य छन्दसः उदाहरणं लिखत :

निम्नलिखित में से किसी **एक** छन्द का उदाहरण लिखिए :

Illustrate any **one** of the following metres with an example : 2×1=2

उपजातिः, अनुष्टुप, शार्दूलविक्रीडितम्।

**12.** (अ) अधोलिखिताः परिभाषाः पूरयत : :

निम्नलिखित परिभाषाएँ पूरी कीजिए :

Complete the following definitions : 1×4=4

(i) श्लिष्टैः पदै ____________ इष्यते।

(ii) भवेत्संभावनोत्प्रेक्षा ____________।

(iii) अनुप्रासः शब्दसाम्यं ____________।

(iv) साम्यं वाच्यमवैधर्म्यं ____________।

(ब) अधोलिखितयोः **एक**स्य अलङ्कारस्य उदाहरणं लिखत कारणं च स्पष्टीकुरुत :

निम्नलिखित में से किसी **एक** अलङ्कार का उदाहरण लिखिए और कारण भी स्पष्ट कीजिए :

Illustrate any **one** of the following figures of speech with an example and justify the usage : 3×1=3

अर्थान्तरन्यासः, यमकम्।

(स) अधोलिखितपंक्तिषु के अलङ्काराः :

निम्नलिखित पंक्तियों में कौन-से अलङ्कार हैं :

Name the figures of speech in the following lines : 1×3=3

(i) पीत्वा तद्राजपत्न्यस्ता अन्तर्वत्न्योऽभवन् द्रुतम्।

(ii) जानामि तां पश्यन्ती वञ्चितेव।

(iii) प्रकृतिसिद्धमिदं हि महात्मनाम्।